# अथ वायुपुराण-प्रथमखण्डानुक्रमणिका।


| अध्याये | विषयः | पृष्ठे |
|---|---|---|
| १ | अनुक्रमणिका | १ |
| २ | द्वादशवार्षिकसत्रनिरूपणं | १० |
| ३-४-५-६ | सृष्टिप्रकरणं ... | २८ |
| ७ | प्रतिसन्धिकीर्त्तनं ... | ५२ |
| ८ | चतुराश्रमविभागः ... | ६० |
| ९ | देवादिसृष्टिवर्णनं ... | ७९ |
| १० | मन्वन्तरादिवर्णनं ... | ९१ |
| ११ | पाशुपतयोगः ... | १०० |
| १२ | योगोपसर्गाः ... | १०६ |
| १३ | योगैश्वर्य्याणि ... | १११ |
| १४-१५ | पाशुपतयोगः ... | ११४ |
| १६ | शौचाचारलक्षणं ... | ११९ |
| १७ | परमाश्रमप्राप्तिकथनं ... | १२४ |
| १८ | यतिप्रायश्चित्तविधिः ... | १२५ |
| १९ | अरिष्टानि ... ... | १२८ |
| २० | ओँकारप्राप्तिलक्षणं ... | १३२ |
| २१ | कल्पनिरूपणं ... | १३७ |
| २२ | कल्पसंख्यानिरूपणं ... | १४५ |
| २३ | माहेश्वरावतारयोगः ... | १४९ |
| २४ | शार्व्वस्तवं ... ... | १७१ |
| २५ | मधुकैटभोत्पत्तिविनाशवर्णनं | १८८ |
| २६ | स्वरोत्पत्तिः ... ... | १९८ |
| २७ | महादेवतनुवर्णनं ... | २०१ |
| २८ | ऋषिवंशानुकीर्त्तनं ... | २०९ |
| २९ | अग्निवंशवर्णनं ... | २१४ |
| ३० | दक्षशापवर्णनं ... | २२० |
| ३१ | देववंशवर्णनं ... ... | २५२ |
| ३२ | युगधर्म्माः ... ... | २६० |
| ३३ | स्वायम्भूववंशवर्णनं ... | २६७ |
| ३४-३५ | जम्बूद्वीपवर्णनं ... | २७४ |
| ३६-३७-३८ | पूर्व्वादिचतुर्दिग्विभागस्थ-सरःशैलादिकीर्त्तनं | २९३ |
| ३९ | शैलस्थितविविधदेवालय-कीर्त्तनं ... ... | ३०५ |
| ४० | देवकूटपर्व्वतमर्य्यादा-कीर्त्तनं ... ... | ३१२ |
| ४१ | कैलासवर्णनं ... | ३१५ |
| ४२ | देवनदीवर्णनं ... | ३२४ |
| ४३-४४ | केतुमालवर्णनं ... | ३३३ |
| ४५ | भारतवर्षवर्णनं ... | ३४० |
| ४६ | किंपुरुषादिवर्षवर्णनं | ३५४ |
| ४७ | गङ्गावतारवर्णनं ... | ३५८ |
| ४८ | जम्बुद्वीपान्तर्वर्त्तिद्वीप-वर्णनं ... ... | ३६६ |


Digitized by Google

## अथ वायुपुराण-प्रथमखण्डानुक्रमणिका ।


| अध्याये | विषयः | पृष्ठे |
|---|---|---|
| ४९ | सप्तद्वीपादिवर्णनं | ... ३७१ |
| ५०-५१ | ज्योतिःप्रचारः | ... ३९० |
| ५२ | ध्रुवचर्य्या ... | ... ४१० |
| ५३ | ज्योतिःसन्निवेशः | ... ४११ |
| ५४ | नीलकण्ठस्तवः | ... ४४४ |
| ५५ | लिङ्गोद्भवस्तवः | .. ४५७ |
| ५६ | पितृवर्णनं ... | ... ४६५ |
| ५७ | यज्ञप्रवर्त्तनं | ... ४७२ |
| ५८ | चतुर्युगाख्यानं | ... ४८९ |
| ५९ | ऋषिलक्षणं | ... ५०१ |
| ६० | महास्नानतीर्थवर्णनं | ... ५१३ |
| ६१ | प्रजापतिवंशानुकीर्त्तनं | ५२१ |


Digitized by Google

कीर्त्त्यते भगवान् येन प्रसर्पति दिवि स्वयं ॥ ८८ ॥
स रथोऽधिष्ठितो देवैरादित्यैर्ऋषिभिस्तथा ।
गन्धर्व्वैरप्सरोभिश्च ग्रामणीसर्पराक्षसैः ॥ ८० ॥
अपां सारमयश्चेन्दोः कीर्त्त्यते च रथस्तथा ।
हयविध्यौ च सोमस्य कीर्त्त्येते सूर्य्यकारितो ॥ ८१ ॥
सूर्य्यादीनां स्यन्दनानां ध्रुवादेव प्रकीर्त्तनं ।
कीर्त्त्यते शिशुमारश्च यस्य पुच्छे ध्रुवः स्थितः ॥ ८२ ॥
ताराद्वपाणि सर्व्वाणि नक्षत्राणि ग्रहैः सह ।
निवासा यत्र कीर्त्त्यन्ते देवानां पुण्यकारिणां ॥ ८३ ॥
सूर्य्यरश्मिसहस्रं च वर्षशीतोष्णनिःस्रवः ।
प्रविभागश्च रश्मीनां नामतः कर्म्मतोऽर्थतः ॥ ८४ ॥
परिमाणगती चोक्ते ग्रहाणां सूर्य्यसंश्रयात् ।
यथा चाश्च विषात् प्राप्ता शम्भोः कण्ठस्य नीलता ॥८५॥
ब्रह्मप्रसादितस्याश्च विषादः शूलपाणिनः ।
स्तूयमानः सुरैर्व्विष्णुः स्तौति देवं महेश्वरं ॥ ८६ ॥
लिङ्गोद्भवकथा पुण्या सर्व्वपापप्रणाशिनी ।
विश्वरूपात् प्रधानस्य परिणामोऽयमद्भुतः ॥ ८७ ॥
पुरूरवस ऐलस्य माहात्म्यानुप्रकीर्त्तनं ।
पितॄणां द्विप्रकाराणां तर्पणञ्चामृतस्य वै ॥ ८८ ॥
ततः पर्व्वाणि कीर्त्त्यन्ते पर्व्वणाञ्चैव सन्धयः ।
स्वर्गलोकगतानाञ्च प्राप्तानाञ्चाप्यधोगतिं ।
पितॄणां द्विप्रकाराणां श्राद्धेनानुग्रहो महान् ॥ ८८ ॥
युगसंख्या प्रमाणञ्च कीर्त्त्यते च कृते युगे ।

Digitized by Google

अण्डोद्भिज(१) स्वेद जरायुजानां
धर्मात्मनां स्वर्गनिवासिनां वा ।
ये यातनास्थानगताश्च जीवा-
स्तकेषु तेषामपि च प्रमाणं ॥ २० ॥
आत्यन्तिकः प्राकृतिकश्च योऽयं
नैमित्तिकश्च प्रतिसर्गहेतुः ।
बन्धश्च मोक्षश्च विनिश्चितश्च तत्र
प्रोक्ता च संसारगतिः परा च ॥ २१ ॥
प्रवृत्त्यवस्थेषु च कारणेषु
या च स्थितिर्या च पुनः प्रवृत्तिः ।
तच्चात्मयुक्त्या समतिप्रयत्नात्
समस्तमाविष्कृतधीधृतिभ्यः ।
विप्रा ऋषिभ्यः समुदाहृतं यत्
यथातथन्तच्छृणुतोच्यमानं ॥ २२ ॥

इति श्रीमहापुराणे वायुप्रोक्ते सृष्टिप्रकरणं नाम तृतीयोऽध्यायः ।

---

१ अण्डोद्भिज इति आर्षप्रयोगः ।

Digitized by Google

तत्र ते ह्यवतिष्ठन्ति प्रीतियुक्ताः प्रसङ्क्रमात् ।
आनन्दं ब्रह्मणः प्राप्य मुच्यन्ते ब्रह्मणा सह ॥ १० ॥
अवश्यम्भाविनाऽर्थेन प्राकृतेनैव ते स्वयं ।
नानात्वेनाभिसम्बद्धास्तदा तत्कालभाविनः ॥ ११ ॥
स्वरूपतो बुद्धिपूर्व्वं यथा भवति जाग्रतः ।
तत्कालभावि तेषान्तु तथा ज्ञानं प्रवर्त्तते ॥ १२ ॥
प्रत्याहारे तु भेदानां येषां भिन्नाभिलक्षणा ।
तैः सार्द्धं प्रतिसृज्यन्ते कार्य्याणि करणानि च ॥ १३ ॥
नानात्वदर्शनात्तेषां ब्रह्मलोकनिवासिनां ।
विनष्टस्वाधिकाराणां स्वेन धर्म्मेण तिष्ठतां ॥ १४ ॥
ते तुल्यलक्षणाः सिद्धाः शुद्धात्मानो निरञ्जनाः ।
प्रकृतौ कारणातीताः स्वात्मन्येव व्यवस्थिताः ॥ १५ ॥
प्रख्यापयित्वा (१) ह्यात्मानं प्रकृतिस्तेषु सर्व्वशः ।
पुरुषाव्यवहृतत्वेन प्रतीता न प्रवर्त्तते ॥ १६ ॥
प्रवर्त्तिते पुनः सर्गे तेषां वा कारणं पुनः ।
संयोगे प्राकृते तेषां युक्तानां तत्त्वदर्शिनां ॥ १७ ॥
तत्रापवर्गिणां तेषामपुनर्मार्गगामिनां ।
अभावः पुनरुत्पत्तौ शान्तानामर्चिषामिव ॥ १८ ॥
ततस्तेषु गतेषूर्द्धं त्रैलोक्यात्तु महात्मसु ।
तैः सार्द्धं ये महर्लोकास्तदा नासादिता जनाः ।
तच्छिष्टाश्चेह तिष्ठन्ति कल्पाद्दिहमुपासते ॥ १९ ॥
गन्धर्व्वाद्याः पिशाचान्ता मानुषा ब्राह्मणादयः ।

१ ख्यापयित्वेति ख० ।

# अथैकादशोऽध्यायः ।

## पाशुपतयोगः ।

वायुरुवाच । एवं मन्वन्तरं दिव्यमतीतानागतान्यपि च ।
अर्धमासं तथा मासमयनाब्दयुगानि च ॥ १ ॥
महायुगसहस्राणि ब्रह्मणश्चापि स्थितः ।
उपासते महात्मानः प्राप्तं दिव्येन चक्षुषा ॥ २ ॥
अत ऊर्द्धं प्रवक्ष्यामि प्राणायामप्रयोजनं ।
फलञ्चैव विशेषेण यथाह भगवान् प्रभुः ॥ ३ ॥
प्रयोजनानि चत्वारि प्राणायामस्य विद्धि वै ।
शान्तिः प्रशान्तिर्दीप्तिश्च प्रसादश्च चतुष्टयं ॥ ४ ॥
घोराकारशिवानान्तु दार्श्येयां फलसम्भवं ।
स्वयङ्कृतानि कालेन इहामुत्र च देहिनां ॥ ५ ॥
पितृमातृप्रदुष्टानां ज्ञातिसम्बन्धिसङ्करैः ।
क्षपणं हि कषायाणां पापानां शान्तिरुच्यते ॥ ६ ॥
लोभमानात्मकानां हि पापानामपि संयमः ।
इहामुत्र हितार्थाय प्रशान्तिस्तप उच्यते ॥ ७ ॥
सूर्य्येन्दुग्रहताराणां तुल्यस्तु विषयो भवेत् ।
ऋषीणाञ्च प्रसिद्धानां ज्ञानविज्ञानसम्पदां ॥ ८ ॥
अतीतानागतानाञ्च दर्शनं साम्प्रतस्य च ।
बुद्धेश्च समतां यान्ति दीप्तिः स्यात्तप उच्यते ॥ ९ ॥
इन्द्रियाणीन्द्रियार्थांश्च मनः पञ्च च मारुतान् ।

Digitized by Google

Aphroisms of S'aṇḍalya, English, 1 fasci. ... .. Rs. 0 1
Váyu Puráṇa, 2 fasci. ... .. ... ... ... 1 4

## ARABIC AND PERSIAN SERIES.

Dictionary of Arabic Technical Terms, 20 fasci., complete, Rs. 25
Risálah-i Shamsiyah, (Appendix to Do. Do. .. .. 1
Fihrist Túsí, 4 fasci. .. ... ... ... ... 3
Nukhbat-ul-Fikr. .. ... ... ... ... ... 0 1
Futúh-ul Shám. Wáqidí, 9 fasci. .. ... ... ... 5 1
Futúh-ul-Shám, Azadí, 4 fasci. .. .. ... ... 2
Maghází of Wáqidí, 6 fasci.... ... ... ... ... 3
Isábah, 28 fasci., with supplement, ... .. ... ... 20 1
Tárikh-i-Fírúz Sháhí, 7 fasci. ... ... ... ... 1
Táríkh-i-Baiháqí, complete in 9 fasci. ... ... ... 5 1
Muntakhab ut-Tawárikh, vols. I. II. and III., complete in 15 fasci. 9
Wís o Rámín, 5 fasci. .. .. ... ... ... 2
Iqbálnámah-i-Jahángírí, complete in 3 fasci. ... ... ... 1 1
'Alamgírnámah, 13 fasci., with index,... .. ... ... 8
Pádsháhnámah, 19 fasci., with index,.. ... ... ... 11 1
Muntakhab-ul-Lubáb, by Kháfí Khán, 19 fasci., with index ... 12 1
Aín-i-Akbarí, Persian text, 4to., 22 fasci. .. ... ... 27
Aín-i-Akbarí, English translation by H. Blochmann, M. A. vol. I.... 12
Farhang-Rashídí, 14 fasci., complete, ... ... ... 17
Nizámí's Khiradnámah-i-Iskandarí, 2 fasci, complete, ... ... 2
Akbarnámah, 13 fasci. with Index, ... ... ... ... 15
Maásir-i-' Alamgírí, by Muhammad Sáqí, complete 6 fasci, with index, 3 1
Haft Asmán, history of the Persian Masnawí ... ... .. 1
Tabaqát-i-Náçirí, English translation by Raverty, 8 fasci. ... 8
Tabaqát-i-Náçirí, Persian text, 5 fasci. ... ... ... 3

## MISCELLANEOUS.

Journal of the Asiatic Society of Bengal from vols. XII to XVII, 1843-48 vols. XIX to XXI, 1850-52, to Subscribers at Re. 1 per number and to non-subscribers at Re. 1-8 per number; vols. XXVI, XXVII, 1857-58 and vols. XXXIII to XLV, 1864-76, to Subscribers at 1-8 per number and to non-subscribers at Rs. 2 per number.
Asiatic Researches, vols. VII. to XII. and vols. XVII. to XX. each Rs. 10
Do. do. Index, ... ... .. ... .. 5
Catalogue of Fossil Vertebrata, ... ... .. ... 2
———— of Sanskrit Manuscripts, ... ... ... .. 1
———— of Arabic and Persian Manuscripts, ... .. .. 1
Tibetan Dictionary, ... ... ... ... ... 10
———— Grammar,... ... ... ... ... .. 8
Notices of Sanskrit Manuscripts, 13 fasci. .. ... ... 13
Istiláhát-i-Súfiyah. Edited by Dr. A. Sprenger, 8 vo. ... ... 1
Jawámi' ul-'ilm ir-riyází, 168 pages with 17 plates, 4 to. .. 2
Aborigines of India, by B. H. Hodgson, .. ... ... 3
Examination and Analysis of the Mackenzie Manuscripts, by the Rev. W. Taylor, .. ... .. ... ... 2
Han Koong Tsew, or the Sorrows of Han, by J. Francis Davis, ... 1
'Ináyah, a Commentary on the Hidáyah, vols. II. IV., ... .. 16
Analysis of the Sher Chin, by Alexander Csoma de Körös, ... 1
Khazánat-ul-'ilm, .. ... ... ... ... .. 4
Sharáyat-ul-Islám, ... ... ... ... .. ... 4
Anís-ul-Musharrihín, .. ... ... ... ... 3
Catalogue Raisonné of the Society's Sanskrit MSS. No. 1 Grammar ... 2

Digitized by Google

नानापुष्पफलोपेतैः पादपैः समलङ्कृतः ॥ ९ ॥
तस्मिन् गुहासहस्राकीर्णे ह्यनेकोदरकन्दरे।
क्रीड़ावनं महेन्द्रस्य सर्वकामगुणैर्युतं ॥ १० ॥
तत्र तद्देवराजस्य पारिजातवनं महत्।
प्रकाशं त्रिषु लोकेषु गीयते श्रुतिनिश्चयात् ॥ ११ ॥
तरुणादित्यसङ्काशैर्महागन्धैर्मनोहरैः।
पुष्पैर्भाति नगश्रेष्ठः सुदीप्त इव सर्वशः ॥ १२ ॥
समन्तं योजनशतं तं गन्धमनिलो ववौ।
पारिजातकपुष्पाणां माहेन्द्रवननिर्गतः ॥ १३ ॥
वैदूर्य्यनीलैः कमलैः सौवर्णैर्वज्रकेसरैः।
सर्वगन्धवलोपेतैर्मत्तषट्पदनादितैः ॥ १४ ॥
व्याकोशैर्विकचैश्चापि शतपत्रैर्मनोहरैः।
सपङ्कजैर्महापद्मैर्वाप्यस्तत्र विभूषिताः ॥ १५ ॥
शिरेजुरन्तरम्बुस्था: सौवर्णमणिभूषिताः।
परिस्पन्देषणा नित्यं मीनयूथाः सहस्रशः ॥ १६ ॥
कूर्मैश्चानेकसंस्थानैर्मकरपरिष्कृतैः।
चघूर्ण्यमाणैः सलिलैर्भाति चित्रं समन्ततः ॥ १७ ॥
नानावर्णैश्च शकुनैर्नानारत्नतनूरुहैः(१)।
सुवर्णपुष्पैश्चानेकैर्मणितुण्डैर्द्विजातिभिः ॥ १८ ॥
वल्गुस्वरैः सदोन्मत्तैः सम्पतद्भिः समन्ततः।
शुशुभे तद्वनं रम्यं सहस्राक्षस्य धीमतः ॥ १९ ॥

१ नानारत्नतनुच्छदैरिति क०।

